# Shri RuKmini Stavam

# श्रीरुक्मिणीस्तवम्

## Document Information

Text title : Rukmini Stavanam 2

File name : rukmiNIstavanam2.itx

Category : devii, varadAnanda

Location : doc_devii

Author : Swami Varadananda Bharati (Pracharya A. D. AThavale)

Transliterated by : Arun Parlikar

Proofread by : Arun Parlikar

Description/comments : bhAvArchanA

Acknowledge-Permission: Shri Dasganu Maharaj Pratishthan, Gorte https://www.santkavidasganu.org

Latest update : June 3, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2023

*sanskritdocuments.org*

# श्रीरुक्मिणीस्तवम्

ॐ श्री
॥ श्रीशङ्कर ॥

(भुजङ्गप्रयात)
जगन्मातरं मातरं पद्मजादेः
परब्रह्मशक्तिं परामप्रमेयाम् ।
अचिन्त्यामनन्यामनाद्यन्तरूपाम्
शुभां रुक्मिणीं कृष्णपत्नीं नमामि ॥ १ ॥

सुमान्यां शरण्यां वरेण्यां वदान्याम्
हरिप्राप्तिधन्यां विदर्भेशकन्याम् ।
सदा चन्द्रभागातटे विष्टरस्थाम्
शुभां रुक्मिणीं कृष्णपत्नीं नमामि ॥ २ ॥

विभोर्विठ्ठलस्यार्धभागे वसन्तीम्
सतीं पाण्डुरङ्गप्रियां कोमलाङ्गीम् ।
शरच्चन्द्रविम्बाननां दिव्यकान्तिम्
शुभां रुक्मिणीं कृष्णपत्नीं नमामि ॥ ३ ॥

यदीय प्रभावात् विधिः सर्गशक्तो
जगत्पालनेऽभूदुपेन्द्रः समर्थः ।
लये व्योमकेशोऽपि तां सार्वभौमाम्
शुभां रुक्मिणीं कृष्णपत्नीं नमामि ॥ ४ ॥

कृपालेशतोऽस्या रविर्भाति लोके
चकास्ति प्रभा विद्युतः तारकाणाम् ।
सुधांशुः सदाऽऽह्लादकोऽनङ्गसूं ताम्
शुभा रुक्मिणीं कृष्णपत्नीं नमामि ॥ ५ ॥

श्रुतिनामगम्यां सुभावैकगम्याम्
मनोवागतीतां चिदानन्दसत्ताम् ।
रमां शारदां पार्वतीं सर्वमूलाम्
शुभां रुक्मिणीं कृष्णपत्नीं नमामि ॥ ६॥

धरित्रीं सवित्रीं समस्यादिकर्त्रीम्
त्रिलोकैकधात्रीं वरां भीमपुत्रीम् ।
भवोत्पन्नभीशोकमोहापहर्त्रीम्
शुभां रुक्मिणीं कृष्णपत्नीं नमामि ॥ ७॥

लसन्मञ्जुहास्यप्रभालङ्कृतोष्ठीम्
कटाक्षे कृपार्द्रां प्रियोपेन्द्रगोष्ठीम् ।
कटौ न्यस्तहस्तामनन्ताधिदेवीम्
शुभां रुक्मिणीं कृष्णपत्नीं नमामि ॥ ८॥

इति स्वामी वरदानन्दभारतीविरचितं श्रीरुक्मिणीस्तवं सम्पूर्णम् ।

भावार्चना (प्राचार्य अ. दा. आठवले)

https://www.santkavidasganu.org, https://www.youtube.com/@varad-vani1496

Encoded and proofread by Arun Parlikar

*Shri RuKmini Stavam*

pdf was typeset on June 4, 2023

Please send corrections to *sanskrit@cheerful.com*